संस्कृत वार्ता:

20.04.2025

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· जम्मू-कश्मीरे अद्य जम्मू-क्षेत्रस्य रामबन-मण्डलस्य सेरी-बागना-क्षेत्रे मेघ-स्फोटनेन न्यूनातिन्यूनं त्रयः जनाः मृत्युमुपगताः।

· आरबीआई- प्रमुखेन संजयमल्होत्रा इत्यनेन उक्तं यत् भारतस्य विदेशीविनिमयापणानि विगतेषु चतुर्षु वर्षेषु द्विगुणितानि जातानि।

· अमेरिकीय-उपराष्ट्रपति: जेम्स् डेविड् वैन्स् श्वः भारतस्य चतुर्दिवसीय आधिकारिक-यात्रार्थं नव-दिल्लीम् आगमिष्यति।

· देशस्य विभिन्नेभ्यः भागेभ्यः विदेशेभ्यः च ईस्टर-उत्सव: आमान्यते। दिवसस्यास्य निमित्तं गिरिजाघर इत्यतेषु स्थलेषु विशेष-प्रार्थना-सभाः आयोजिताः सन्ति।

· अमेरिकादेशस्य शिकागो-नगरे आयोक्ष्यमाणे स्क्वाशक्रीडायां भारतस्य वीर-चोटरानी, अनाहतसिंहौ च पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य विश्वचैम्पियनशिप इत्यस्याः स्पर्धायाः अर्हतां समर्जितवन्तौ।

<u>जम्मू-कश्मीर-भूस्खलनम्</u>

जम्मू-कश्मीरे अद्य जम्मू-क्षेत्रस्य रामबन-मण्डलस्य सेरी-बागना-क्षेत्रे मेघ-स्फोटनेन न्यूनातिन्यूनं त्रयः जनाः मृत्युमुपगताः। रामबन-क्षेत्रे गतरात्रौ तीव्र हिमपातः बहुविध-भूस्खलनं, तीव्र-वायुः प्रवाहः च अभवन् । अद्य प्रातःकाले मण्डलस्य धरमकुण्डग्रामे प्रचण्डवृष्ट्या जलप्लावेन प्रायः शताधिकाः जनाः उद्धारिताः। क्षेत्रे प्रतिकूल-ऋतो: कारणेन ग्रामे चत्वारिंशत् आवासगृहाणि क्षतिग्रस्तानि अभवन् । आकाशवाण्याः सह चर्चायाम् उपायुक्तेन बसीर-उल-हक चौधरी इत्यनेन उक्तं यत् नदीनां जलस्रोतानाम् अतिप्रवाहस्य कारणेन जलाप्लवेन कारणेन अनेकानि वाहनानि प्रवहितानि।

रामबन मण्डल प्रशासनेन जिला नियन्त्रण कक्षस्य आपत् दूरभाष संख्यापि प्रसारितास्ति , संख्या अस्ति – शून्यम्, एकम्, नव, नव, अष्ट - द्वे, नव, पञ्च, पञ्च, शून्यम्, शून्यम् अपर: शून्यम्, एकं, नव, नव, अष्ट- द्वे, षड्, षड्, सप्त, नव, शून्यम् इति।

तत्रैव केन्द्रीयमन्त्री डॉ जितेन्द्रसिंहः जम्मू-कश्मीरस्य मुख्यमन्त्री उमर अब्दुल्ला च अस्यां घटनायां प्राणहानिविषये दुःखं प्रकटितवन्तौ। केन्द्रीयमन्त्री सामाजिकान्तर्जालीये संदेशे अवदत्, सः मण्डलस्य उपायुक्तेन सह नित्यं सम्पर्के अस्ति। सः अवदत् यत् आर्थिकादिकं सर्वविधं सहायता: प्रदत्ताः भविष्यन्ति। सामाजिकमाध्यमेषु गत्वा जम्मू-कश्मीरस्य मुख्यमन्त्री अवदत् यत् सः दिने जीर्णोद्धारस्य, उद्धारस्य, च कार्याणां समीक्षां करिष्यति।

<u>आरबीआई-</u>

आरबीआई- प्रमुखेन संजय मल्होत्रा इत्यनेन उक्तं यत् भारतस्य विदेशीविनिमयापणानि विगतेषु चतुर्षु वर्षेषु द्विगुणितानि जातानि। बाली देशे एफ आई एम एम डी ए-पी डी ए आई इत्यस्य वार्षिकोत्सवासरे सः प्रोक्तवान् यत् भारतस्य वित्तीय आपणानि आर्थिक-विकासं संवर्धयितुं गतिशीलरूपेण विकसितानि जातानि। यस्मिन् विंशत्यधिकद्विसहस्रतमे वर्षे वैदेशिक-मुद्रा-आपणं द्वात्रिंशत् बिलियन् डॉलरमितात् द्विगुणीभूय चतुर्विंशत्यधिकद्विसहस्रतमं वर्षं यावत् षष्टि-बिलियन् डॉलरमितं सञ्जातमस्ति।मल्होत्रा-वर्येण अपि उक्तं यत् भारतीयविपण्येषु पारदर्शितायाः स्तरः विश्वस्य सर्वोत्तमः वर्तते।

<u>पीएम-सऊदी यात्रा</u>

प्रधानमन्त्री नरेन्द्रमोदी सऊदी अरब-देशस्य द्विदिवसीययात्रायां मंगलवासरे जेद्दाह-नगरं संप्राप्स्यति, यत् चतुर्षु दशकेषु भारतीयनेतृणां सऊदी-अरबस्य वाणिज्यिककेन्द्रस्य प्रथमा यात्रा अस्ति। एषा उच्चस्तरीययात्रा भारत-सऊदी-सम्बन्धानां सामान्यारम्भात् आर्थिक-रक्षा-सांस्कृतिक-आयामेषु विस्तृत-रणनीतिक-सहभगित्वं यावत् उल्लेखनीय-परिवर्तनं प्रकाशयति। प्रधानमन्त्रिणः आगामियात्रायाः महत्त्वस्य विषये प्रवदन् सऊदी अरबदेशे भारतीयराजदूतः सुहेल एजाजखानः उक्तवान् यत् एषा महत्त्वपूर्णा यात्रा अस्ति, यस्य उद्देश्यं द्वयोः देशयोः सामरिकसहभागितां संवर्धनमिति वर्तते।

## अमेरिकीय-उपराष्ट्रपति:

अमेरिकीय-उपराष्ट्रपति: जेम्स् डेविड् वैन्स् श्वः भारतस्य चतुर्दिवसीय आधिकारिक-यात्रार्थं नव-दिल्लीम् आगमिष्यति। तेन सममेव अमेरिकादेशस्य बहवः वरिष्ठाधिकारिणः चापि सहभूता: भविष्यन्ति। भारतं प्रति उपराष्ट्रपतेः-वैनस्य एषा प्रथमा यात्रा वर्तते। श्वः सः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मेलनं करिष्यति। उपराष्ट्रपतिः-वैनः तस्य प्रतिनिधिमण्डलस्य सदस्या: च नवदिल्ल्यां अन्येषु कार्यक्रमेषु अपि भागग्रहणं करिष्यन्ति अमेरिकादेशं प्रति प्रत्यागमनात् पूर्वं सः जयपुर-आगरा-नगर्योः भ्रमणं अपि करिष्यति। विदेश मन्त्रालयेन उक्तं यत् एषा यात्रा उभयोः देशयोः द्विपक्षीयसम्बन्धानां प्रगतेः समीक्षां कर्तुं अवसरं प्रदास्यति।

## ईस्टर-उत्सवः

ईशामसीहस्य गुडफ्राइडे- इत्यस्मिन् दिने कैल्वरी-नगरे तस्य क्रूस इत्यस्मिन् स्थापनेन मृत्योः अनन्तरं पुनरुत्थानं अभवत्। देशस्य विभिन्नेभ्यः भागेभ्यः विदेशेभ्यः च ईस्टर-उत्सवस्य सूचनाः प्राप्ताः सन्ति। दिवसस्यास्य निमित्तं गिरिजाघर इत्यतेषु स्थलेषु विशेष-प्रार्थना-सभाः आयोजिताः सन्ति। केरलराज्ये सहस्राणि यावत् जनाः अस्य उत्सवस्य आयोजने एकत्रिता: सन्ति। बिशपाः वरिष्ठाः पादरीः इत्येताः च विभिन्नेषु पूजा गृहेषु ईस्टर-मास-समारोहस्य नेतृत्वं कृतवन्तः, जनान् शान्तिपूर्वकं स्थातुं, समाजे वंचितानाम्, कृते विचारं कर्तुं च आग्रहं कृतवन्तः , उत्सव: मानवजातेः हिताय ईशामसीहेन व्यतीतानां दुःखानां त्यागस्य, प्रार्थनायाः, चिन्तनस्य च एकस्य ऋतोः समाप्तेः संकेतं प्रददाति।

## वक्फ सुधार जनजागरण अभियान

भारतीय जनता पार्टी इति दलेन वक्फ संशोधन अधिनियमस्य लाभानां विषये जनान् जागरूकान् कर्तुं - 'वक्फ सुधार जनजागरण अभियान' इत्याख्यम् एकं राष्ट्रव्याप्यभियानं अद्य समारब्धम्। अभियानमिदं मई मासस्य पञ्चम-दिनांकं यावत् प्रचलिष्यति। अस्य अभियानस्यान्तर्गतं, भाजपादलस्य नेतारः काकार्यकर्तरश्च मुस्लिम-समुदायस्य जनैः सह मेलनं विधास्यन्ति सममेव संशोधित अधिनियमानां विषये तान् जागरूकान् अपि करिष्यन्ति। इतः पूर्वं भाजपादलस्याध्यक्षः जगत प्रकाश नड्डा विपक्षेषु दलेषु वोट बैंक इत्यस्य राजनीतिं कर्तुं संशोधित विधेः प्रावधानमालक्ष्य मुस्लिम जनेषु भ्रन्तेरुत्पादनस्य आरोपम् आरोपितवान् आसीत्।

## दिल्ली मुख्यमन्त्री

दिल्ल्या: मुख्यमन्त्री रेखागुप्ता अद्य राष्ट्रिय-राजधान्या: बुराड़ी क्षेत्रात् एकादश शततोप्यधिकं यावत् जीपीएस युतानां जलवाहक वाहनानां हरित ध्वजं प्रदर्शितवती। एतै वाहनै: तेषु क्षेत्रेषु जलापूर्तिं भविष्यति यत्र जलस्य अतिन्यूनता दृश्यते अथवा यत्र नलिकामाध्यमेन जलापूर्तिम् असम्भवमेव। कार्यक्रमावधौ सुश्रीगुप्ता इत्यनया साकं दिल्ली सर्वकारस्य मन्त्रिण: नगरस्य सांसदा: अपि उपस्थिता: आसन्। कार्यक्रमं सम्बोधयन्त्या मुख्यमन्त्रिणा प्रोक्तं यत् प्रधानमन्त्रिण: नरेन्द्र मोदिन: नेतृत्वे दिल्ली सर्वकार: राष्ट्रिय राजधान्या: विकासाय पूर्ण पारदर्शितां संस्थापयिष्यति।

## स्क्वाश -

स्क्वाश क्रीडायां भारतस्य वीर-चोटरानी, अनाहतसिंहौ च पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य विश्वचैम्पियनशिप इत्यस्याः स्पर्धायाः अर्हता समर्जितवन्तौ, यत् आगामिमासे अमेरिकादेशस्य शिकागो-नगरे भविष्यति। अधुना विश्वचैम्पियनशिप इत्यस्याः क्रीडायाः पुरुषैकलस्पर्धायां कुलचत्वारः भारतीय-क्रीडकाः वीरचोटरानी, रमित टण्डनः, अभयसिंहः, वेलावन सेन्थिलः च भागं स्वीकरिष्यन्ति। तत्रैव महिलावर्गे अनाहतः प्रथमे विश्वचैम्पियनशिप क्रीडायां भागं भजिष्यति।

## क्रिकेट्

आई.पी.एल्.-क्रिकेट्-स्पर्धा-मालिकायां पंजाब किंग्स दलेन षड्क्रीडकानां हानि पुरस्सरं अष्ट पञ्चाशदधिकैक-शतधावनांकानां लक्ष्यं रायल चेलेंजर्स बेंगलुरुदलस्य सम्मुखे स्थापितम्। तत्रैव सायं सार्धसप्तवादने मुम्बय्या: वानखेड़े क्रीडांगणे मुम्बई इंडियंस दलं चेन्नई सुपर-किंग्स-दलेन सह स्पर्धिष्यते।

।। इति वार्ता: ।।